# Shri Hanumat Samhita

# श्रीहनुमत्संहिता

## Document Information

Text title : Hanumat Samhita

File name : hanumatsaMhitA.itx

Category : hanumaana, saMhitA

Location : doc_hanumaana

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Latest update : August 26, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 25, 2025

*sanskritdocuments.org*

# श्रीहनुमत्संहिता

## १. अथ प्रथमोऽध्यायः ।

जयत्यनन्ताब्जजशङ्करप्रियो महाबली वीरबली मुखाग्रणीः ।
प्रचण्डमार्तण्डसहस्रकान्तिः श्रीरामपादद्वयचिन्ततानः ॥ १॥

कुम्भोद्भवायाम्बुधिशोषणाय विशुद्धविज्ञानशुभप्रदाय ।
श्रीरामपादद्वेयनिश्चिताय महामुनीन्द्राय नमो नमस्ते ॥ २॥

अगस्त्य उवाच -
श्रुतं रामस्य माहात्म्यं तव वक्त्रान्महाकपे ! ।
ऐश्वर्य्यमतुलं तेजः प्रभावं परमात्मनः ॥ ३॥

माधुर्य्यं गोपनीयं च यदलभ्यं सुरासुरैः ।
ब्रह्मवेदविदां श्रेष्ठः कपिलो नारदस्तथा ॥ ४॥

वैष्णवानां च प्रवरः श्रीपञ्चाननसर्व्वदृक् ।
प्रह्लादः सनको व्यासस्तथा वैयासकिर्हरिः ॥ ५॥

पराशरस्सुरास्सर्व्वे देवेन्द्रा ऋषयस्तथा ।
श्रीः शर्व्वाणी च सावित्री शेषः सिद्धा महर्षयः ॥ ६॥

विभीषणाद्या ये साध्या वैष्णव्यो वैष्णवास्तथा ।
सर्व्वेषामप्यलभ्यं यन्माधुर्य्यं जानकीपतेः ॥ ७॥

तत्सर्व्वं श्रोतुमिच्छामि विस्तरेण तवाननात् ।
त्वं शान्तश्चानुशीलश्च सतां मध्ये प्रपूजितः ॥ ८॥

इति श्रुतं मया सर्व्वं तेन त्त्वां प्रणमाम्यहम् ।
यद्यस्ति ते कृपा मह्यं गुह्यं तद् वद साम्प्रतम् ॥ ९॥

रसिकानां हृदाऽऽह्लादकारिणी पावनीं कथाम् ।
कथयन्ति महात्मानः प्राप्नुवन्ति हरेः पदम् ॥ १०॥

श्रीहनुमानुवाच -
साधुपृष्ठोऽस्मि विप्रर्षे मनसैवेति निश्चितम् ।
गुह्याद् गुह्यतरं दिव्यं तव प्रीत्या वदाम्यहम् ॥ ११॥

गोलोकनिर्णयं सर्व्वमैश्वर्यं च निवेदितम् ।
अद्य ते कथयिष्यामि प्रेमामृतमहोत्सवम् ॥ १२॥

पावनं सर्व्वसत्त्वानां रसिकानां च जीवनम् ।
न देयं कस्यचित्त्वेतत् प्राणात् प्रियतरं महत् ॥ १३॥

यच्छ्रुत्वा नियतं वासो गोलोके नात्र संशयः ।
अयोध्याधिपतिः श्रीमान् रामो राजीवलोचनः ॥ १४॥

जानक्या सह सुप्रीतः क्रीडारसविलम्पटः ।
माधुर्य्यसुखसम्पन्नामुवाच जनकात्मजाम् ॥ १५॥

गम्यतां सरयूतीरं मनो मे त्वरयत्यलम् ।
इत्युक्त्वा तां करे धृत्वा जगाम रघुनन्दनः ॥ १६॥

महारासरसोल्लासी विलासी सर्वदेहिनाम् ।
ज्ञात्वा तयोर्मनोभावं सख्यः पररसोत्सुकाः ॥ १७॥

सुकेश्यः सुस्मिताश्चैव सुश्रोण्यः परमाद्भुताः ।
रूपयौवनशालिन्यः सर्वाऽऽभरणभूषिताः ॥ १८॥

पीनोरोजा दृढोरुत्काः काश्चित्तालफलस्तनाः ।
गानविद्याकलालापकुशलाः प्रेमपूरिताः ॥ १९॥

विदग्धा विविधाकाराः कामविद्याविशारदाः ।
नानावादित्रकुशलाः रामचित्तापहारकाः ॥ २०॥

यासां कलाकलांशेन जातानार्य्यो रमादयः ।
सर्वा रामार्पितधियो जानकीपरिचारिकाः ॥ २१॥

अनन्तकोट्यस्ताभिश्च वेष्टिता जनकात्मजा ।
विचक्षणा लक्षणाढ्या स्वर्णचम्पकविग्रहा ॥ २२॥

परमानन्दशालिन्यः नानेङ्गितसुपण्डिताः ।
तासां मध्ये विराजन्तौ परमप्रीतिवर्द्धनौ ॥ २३॥

सुकुमारौ कोमलाङ्गौ मारमाधुर्य्यमोहनौ ।

कुङ्कुमाङ्कितसर्व्वाङ्गौ चन्दनेन सुचर्च्चितौ ॥ २४॥

नानाकुसुममालाभिः सुरभीकृततदिङ्मुखौ ।
परस्पररसाभिज्ञौ मनोवाचामगोचरौ ॥ २५॥

कटाक्षक्षेपसम्पन्नौ लीलयाद्भुतदर्शनौ ।
प्रेमामृतरसावेशौ करग्रहणविह्वलौ ॥ २६॥

एवं नानाविधानेन गच्छन्तौ वनचारिणौ ।
यत्पादाम्बुजगन्धेन भ्रमन्त्यखिलषट्पदाः ॥ २७॥

नखं चन्द्राद्भुतं दृष्ट्वा चकोराः परिबभ्रमुः ।
सौदामिनीधनं दृष्ट्वा चातका परिबभ्रमुः ॥ २८॥

गमनं सुन्दरं दृष्ट्वा वञ्चिता हंसकुञ्जराः ।
नव्यलावण्यकं दृष्ट्वा मूर्च्छितौ रतिमन्मथौ ॥ २९॥

हास्यलास्यकटाक्षैश्च चाटुकारैर्मनोहरैः ।
नानेङ्गितैः सुमधुरैर्वाद्यैर्विविधनिर्मलैः ॥ ३०॥

वेष्टितौ वलिभिस्तौ तु तु गच्छन्तौ वनदम्पती ।
परस्पररसावेशौ प्राप्तौ तौ वनमुत्तमम् ॥ ३१॥

तत्र दिव्यासने दिव्ये कानने मणिवेष्टिते ।
विराजन्तौ कलाभिज्ञौ दृष्ट्वा सख्यः प्रमोदिताः ॥ ३२॥

पूजयन्त्यः प्रयत्नेन गन्धमाल्यैः सुसम्भृतैः ।
नानान्नपानभोगैश्च तर्पिताः प्रीतसंयुताः ॥ ३३॥

पक्वताम्बूलकर्पूरं दत्वा ताभ्यां प्रयत्नतः ।
ननृतुर्मुखमालोक्य सर्वा रामरसोत्सुकाः ॥ ३४॥

भ्रमद्भ्रमरिकायुतं वनमनन्तमत्यद्भुतं
निवेश्य जनकात्मजारुचिरकन्धरांसे भुजम् ।
नमामि रसभाजनं विजयभामिनीसंयुतं
विविक्तसरयूतटे रसिकमौलिमालं हरिम् ॥ ३५॥

॥ इति श्रीहनुमत्संहितायां परमरहस्ये महारासोत्सवे प्रथमोऽध्यायः ॥

# २. अथ द्वितीयोऽध्यायः ।

अगस्त्य उवाच -
ततः किं कृतवान् रामो जानकीप्रेमलम्पटः ।
कथ्यतां रसिकश्रेष्ठ यन्मनः सुस्थिरं भवेत् ॥ १॥

श्रीहनुमानुवाच -
तौ तत्र दृष्ट्वा विपिनं मनोहरंवरं च कुन्दैः परिवेष्टितं महत् ।
यन्मूलवेदी मणिमालसंयुता हेमैर्महार्हैः परितश्च सम्भृता ॥ २॥

प्रसन्नदीप्तौ परमासनस्थितौ विराजमानौ च विभूषणान्वितौ ।
परस्परावेशविलाससम्भ्रमौ शुचिस्मितौ नित्यवयः किशोरकौ ॥ ३॥

नानासुगन्धानि वनानि कानिचित् प्रफुल्लितानीह ततस्समन्ततः ।
द्विरेफमालाः शुभसंयुतानि पिबन्ति माध्वीकरसानि संहतिः ॥ ४॥

पतन्ति मत्ता रजसाऽरुणाङ्गा स्वपन्तिकेचित्कुसुमाकरेषु ।
क्वचिन्मयूराः परिनर्त्तयन्ति गायन्ति कीराः क्वचिदप्रमेयाः ॥ ५॥

अन्ये द्विजाः केचन जाङ्गलस्था निरीक्षमाणा रघुवंशनाथम् ।
ध्यानेक्षणाश्चारुनिमेषनेत्राश्चित्रार्पिताश्चिन्मनसो बभूवुः ॥ ६॥

ततः प्रविश्य श्रीरामः सीतया सह शोभनम् ।
काननं वकुलैर्जुष्टं परमानन्ददायकम् ॥ ७॥

पत्रा वृक्षा लताद्याश्च पारिजातहतश्रियः ।
सर्व्वे किशोराः कैशोर्य्यैः वरपल्लवसंयुताः ॥ ८॥

प्रसूनवरभारेण नम्रशाखा महीं गताः ।
तद्गन्धवायुना शश्वत्पूरिता दशदिङ्मुखाः ॥ ९॥

तत्राद्भुतफलं रम्यं स्वादयन्तः सुधासमम् ।
खगाः सन्तुष्टमनसो नृत्यन्तश्च सुखोचिताः ॥ ११॥

यत्र भूः काञ्चनी दिव्या खचिता मणिमालकैः ।
नानावेदीदीव्यमाना मणिकुट्टिमशालिनी ॥ १२॥

मयूरकीरकलितैर्मण्डिता मधुरस्वरैः ।
सखीनां गानगाम्भीर्य्यसौन्दर्य्यपरिपूरिता ॥ १३॥

सुखास्तरणविस्तीर्णपर्य्यङ्कैरुपशोभिता ।

तत्र रामो महाबाहू रमते रमताम्वरः ॥ १४॥

ततः प्राप्तो वनं दिव्यं माधवीपुञ्जमण्डितम् ।
नानामणिगणाकीर्णं विस्तृतं परमासनैः ॥ १५॥

मत्तालिजालसङ्घुष्टं कुञ्जपुञ्जैस्सुवेष्टितम् ।
महाह्लादकरं कान्तं कान्ताचित्तापहारकम् ॥ १६॥

पक्षिसङ्घैश्च निनदैर्नादितं परमाद्भुतम् ।
मदनोन्मादनकरं श्रीमदूर्जितसुप्रभम् ॥ १७॥

परस्परं भाषयन्तौ केलिकौतूहलान्वितौ ।
तत्र प्रेमरसावेशौ विहरन्तौ सुदम्पती ॥ १८॥

महद् वनं समापेतौ सर्वाभरणभूषितौ ।
एलाकर्पूरताम्बूलचर्वणादिकृतादरौ ॥ १९॥

कटाक्षक्षेपणासक्तौ हास्यलावण्यलालितौ ।
कन्दर्पदीप्तिदर्पघ्नौ महामाधुर्य्यमण्डितौ ॥ २०॥

तत्र नानाविधाः क्रीडाः क्रीडमानौ सुनर्मभिः ।
ततः प्रविश्य श्रीरामः परमानन्ददायकम् ॥ २२॥

वनं वृन्दावनं नाम सर्व्वध्यानमयं परम् ।
तत्र वृन्दा सखी साक्षात्सेवते शिवमुत्तमम् ॥ २३॥

वज्रवैदूर्य्यमाणिक्यमण्डिता भूः सुविस्तृता ।
नानाकुञ्जकलापैश्च वेष्टिता हेमवल्लिका ॥ २४॥

यद् वहन्ति त्रिधा वाता रञ्जिताः पुष्परेणुभिः ।
प्रभया भासमाना सा मनोवाचामगोचरा ॥ २५॥

गुञ्जन्मधुव्रतश्रेणीनानाद्विजसमाकुला ।
रमते तत्र वैदेह्या सह रामो रसात्मकः ॥ २६॥

विलासनिपुणास्सख्यस्ताभिः सह विलासकृत् ।
विचित्राम्बरभूषाभिर्भासमानाभिरावृतः ॥ २७॥

ततो मन्दारकं नाम वनं सर्ववनाद्वरम् ।
सुखदं शुभदं साक्षाद् ब्रह्मज्योतिर्मयं वरम् ॥ २८॥

द्विजालिपुञ्जकूजितं कामिनां कामदं वरम् ।
सर्वपक्वफलोपेतं मधुभारैर्विलम्बितम् ॥ २९॥

वेदीमण्डपसम्बाधं मणिस्तम्भैर्विभूषितम् ।
पद्मरागस्य पद्ममाभसोपानैरुपशोभितम् ॥ ३०॥

अतीवनिर्मलं कान्तं कामिनीकामवर्धनम् ।
विनोदयन् जनकजां तत्र रामो रराम ह ॥ ३१॥

विहरन्तौ वने तस्मिन् हरिचन्दनसंज्ञिते ।
यत्र वृक्षा लता कुना हेमवल्कलशालिनः ॥ ३२॥

नानाप्रसूनप्रवरा युक्ता मत्तमधुव्रतैः ।
खगैः कनकचित्राङ्गैः कूजद्भिरभिनन्दिताः ॥ ३३॥

सुरत्नमणिमाणिक्यवेदिसुस्थानमण्डिताः ।
सखीनां गानकलनं सुगन्धानिलसेविताः ॥ ३४॥

क्रीडयंश्च ततः श्रीमान् ययौ वनमनुत्तमम् ।
पारिजातद्रुमैर्यत्तु वेष्टितं परमाद्भुतम् ॥ ३५॥

नानारत्नमणिस्तम्भकदम्बैरन्वितं गृहम् ।
सर्वभोगैः समायुक्तं मनोऽभिलषितं च यत् ॥ ३६॥

मन्मथाविष्टहृष्टः सन् रमते सीतया सह ।
ततः सन्तानेसम्पन्ने विपिने कुसुमाकरे ॥ ३७॥

भ्रमद्भ्रमरसङ्घुष्टभ्राजिते परमान्विते ।
सखीनां गीतवादित्रमहापीठे मनोरमे ॥ ३८॥

परमाद्भुत सङ्कासो हास्यलास्यविनोदकृत् ।
ययावन्यद्वनं रामो नागकेसरमण्डितम् ॥ ३९॥

यस्याविदूरे सरयूतीरं परमपावनम् ।
दृष्ट्वा सर्वाः प्रहृष्टास्ताः सख्यः प्रेमप्रपूरिताः ॥ ४०॥

गायन्त्यो नर्तयन्त्यश्च हासयन्त्यः परस्परम् ।
परमानन्दजलधौ मग्नाः कौतूहलान्विताः ॥ ४१॥

एवं पुण्यान्यरण्यानि गतास्तानि नवानि च ।
तन्मध्येऽशोकवनिका सर्वेषामप्यगोचरा ॥ ४२॥

पुंसामगोचरं स्थानं केवलं प्रेमदायकम् ।
ये तथाभावसंयुक्ता तेषां दृश्यं भवेद् ध्रुवम् ॥ ४३॥

संरुचिरं विपिनं विलोक्य सर्व्वं विहरन् नित्य विलासवांश्च रामः ।
जयति जनकजा जानिरीशो धीरोदात्तगुणाकरो रसज्ञः ॥ ४४॥

॥ इति श्रीहनुमत्संहितायां परमरहस्ये महारासोत्सवे द्वितीयोऽध्यायः ॥

## ३. अथ तृतीयोऽध्यायः ।

अगस्त्य उवाच -
श्रावं श्रावं रासरसं तव वक्त्रान्महामते ।
न तृप्यति मनो मेऽद्य हविर्भुक् हविषा यथा ॥ १॥

श्रीहनुमानुवाच -
मुनिवर्य्य महाभाग धन्यधन्योसि धन्यकृत् ।
यथा स्पर्शमणिस्पर्शाल्लौहोऽपि स्वर्णतां व्रजेत् ॥ २॥

तथा भागवतानाञ्च सङ्गाद् भवति मुक्तिभाक् ।
श्रूयतां तेऽभिधास्यामि रहस्यं लोकपावनम् ॥ ३॥

रम्यं सरय्वाः पुलिनं पवित्रं सुविस्तृतं काननपादपाढ्यम् ।
प्रफुल्लपद्माकरवायुयुक्तं भात्यन्यपुष्पैः परितः प्रसन्नम् ॥ ४॥

यत्सौरभास्वादुमयैः सदागतेर्गतागतैः पूरितविश्वखण्डम् ।
परिभ्रमन्ती मधुपानमत्ता यत्रालिमाला कलमण्डिता च ॥ ५॥

मही मयूखैः खचिता महद्भिर्मणिप्रवालै रुचिरा समन्तात् ।
हिरण्मयी मूर्तिमती श्रियाढ्या यत्राद्भुताः सन्ति विहारलीलाः ॥ ६॥

जलानि शीतांशुकरोर्जितानि गोक्षीरशङ्खद्युतिसम्मितानि ।
सुधाशरन्मेघनिभानि यानि श्रीमन्दिरेऽस्मिन्नुपसंशितानि ॥ ७॥

हिमागमाच्छीतविडम्बितानि स्वादूनि माध्वीकरसाद्भुतानि ।
स्वच्छानि सच्चिच्चसमप्रभाणि कर्पूरकुन्दाद्भुतदर्शनानि ॥ ८॥

महार्हमाणिक्यमणिप्रकारैर्वैदूर्यवज्राङ्कुरसुप्रसन्नैः ।
युक्तैव तेषां सिकतान्विता या विराजते सा सरयू प्रसन्ना ॥ ९॥

वीचीदुकूला शतपत्रवक्त्रिका नीलेक्षणा चारु कुमुद्वतीस्मिता ।
आरालशैवालवृहच्छिरोरुहा भव्यांवरा नव्यवधूरिवाभवत् ॥ १०॥

प्रफुल्लितं यत्र चतुर्विधं महत् सरोरुहं षद्दराजिवेष्टितम् ।
कुमुद्वतीन्दीवरमञ्जुमण्डितं कह्लारकाह्लादि जलं व्यभासत ॥ ११॥

यत्रारुचत्कौस्तुभपद्मराग स्यमन्तवंशच्छदशोभमाना ।
नाना मणीनामतिदीप्तिकानां वितर्किताकर्प्रतिमा च रेणुः ॥ १२॥

चक्राङ्गदात्यूहमरालसारसाः सदारका वै जलकुक्कुटादयः ।
क्रीडन्ति व्रीडां परिहृत्य सर्वतो निवासमप्या कलयन्ति पक्षिणः ॥ १३॥

कम्बूकशम्बूकनभोविकाशा वसन्ति मुक्ता भुजगाश्च कूर्माः ।
अन्योन्यविद्वेषमपास्य दूरात् पिबन्ति पीयूषमृणालिकानि ॥ १४॥

वनं वनं पद्ममुखैर्विकासितं विराजितं कुन्दसुमल्लिकादिभिः ।
स्मितं तनोत्येवमुदारलीलया परस्परेणाविहितां श्रियं तथा ॥ १५॥

हरिनयनोत्थविलासकारिणी प्रणतेष्वप्रणतेषु वा प्रसन्ना ।
जलदुरित कदम्वखण्डनश्री सरयू त्वंवर वर्णनि प्रसीद ॥ १६॥

तज्जलेन जलजन्तवश्चये यत्र कुम्भपतिताः खगादयः ।
प्राणमोचनकृतोऽपि तत् क्षणाद् ब्रह्मरुद्रविबुधेन्द्रवन्दिताः ॥ १७॥

तन्मध्येऽशोकवनिका दिव्यपादपसङ्कुला ।
प्रफुल्लिता चारुकान्तिः श्रीमद्भ्रमरमालिनी ॥ १८॥

ज्योतिष्मती मणिद्योतवती प्रेमप्रदा सती ।
रामप्रिया चक्ररूपा हरिनेत्रभवाऽमृता ॥ १९॥

तत्र चिन्तामणेर्भूमिर्वाञ्छाधिकफलप्रदा ।
यद्गत्वा न निवर्तन्ते प्राणिनो भाग्यगोचरात् ॥ २०॥

तत्र गुल्मलतावृक्षा वज्रसाराः स्फुरन्त्यहो ।
प्रसारिपत्रतिलकाः पद्मरागप्रसूनकाः ॥ २१॥

प्रेमामृतरसैः पूर्णान्यनन्तानि फला निच ।
केवलं रसिकानां वै जीवनाज्जीवनानि च ॥ २२॥

निर्मला वाटिका रम्या वेदादिभिरगोचराः ।
योगी योगसुनिष्पन्ना यज्ज्योतिषि निमज्जति ॥ २३॥

परमानन्ददा सा तु ब्रह्मज्योतिभिरावृता ।
तज्ज्योतिर्भेदने शक्ता रसिका रसवेदिनः ॥ २४॥

विना रामप्रसादेन नान्येषां गमनं भवेत् ।
यत्र तज्ज्योतिषः प्राणो राजते सीतया सह ॥ २५॥

सन्तानकतरोर्मध्ये दिव्यमण्डपमण्डिते ।
महार्हास्तरणैः सम्यक् वेष्टितैर्मणिमालके ॥ २६॥

नाना प्रसूनगन्धाढ्यैर्धूपवासैः तु वासिते ।
चिन्तामणिमहापीठे लसन्मणिगणाञ्चिते ॥ २७॥

पद्मदिव्यार्कसङ्काशे दृष्टिविभ्रमकारके ।
कोमलास्तरणे शुभ्रे विराजेते सुदम्पती ॥ २८॥

तयोः कटाक्षमात्रेण ब्रह्माण्डानां सहस्रशः ।
आविर्भावतिरोभावा भवन्त्यपि न संशयः ॥ २९॥

महाशम्भुसहस्रस्य महाब्रह्मशतस्य च ।
सृष्टिस्थितिलयानाञ्च कर्ता श्रीरघुनन्दनः ॥ ३०॥

रमते सीतया सार्धं प्रेम्णा प्रेमरसास्पदम् ।
हास्यलास्यकटाक्षैश्च मोदयञ्जनकात्मजाम् ॥ ३१॥

असृजद् विश्वसृक् शश्वन्मनसा मनसोद्भवम् ।
दुर्निवारं सुचार्वङ्गं रत्या सह रघूत्तमः ॥ ३२॥

दृढव्रत व्रतहरमाकीट ब्रह्ममोहनम् ।
प्रसूनचापं विगुणं विभ्रत्पञ्चेषुभिस्सह ॥ ३३॥

दम्पत्योः साम्प्रतं चित्तं मोहयन्तत्र कानने ।
प्रियं प्रियां कटाक्षेण चित्तेनाकलनेन च ॥ ३४॥

बोधयामास तां प्रेम्णा स्वेच्छया रमणेच्छया ।
रघुवंशयशश्चन्द्रः कान्ताभिः सहितस्य वै ॥ ३५॥

रामस्य हृदयं ज्ञात्वा जानकी स्वाङ्गतोऽसृजत् ।
नार्यष्टादश साहस्रमष्टोत्तरशतैर्युतम् ॥ ३६॥

वह्निशुद्धांशुकाधानाः सर्वाभरणभूषिताः ।

किशोर्य्यः परमाह्लादजनन्यः परमाद्भुताः ॥ ३७॥

रूपयौवनशालिन्यो मालिन्यः पद्मलोचनाः ।
नानागुणाढ्यश्चार्वङ्ग्यः कामशास्त्रविशारदाः ॥ ३८॥

नानेङ्गित्तसमायुक्ता रामप्रेमप्रपूरिकाः ।
तत्र काश्चित्पद्म गन्धाः काश्चित्मालतिसौरभाः ॥ ३९॥

मल्लिका गन्धवत्यश्च केतकी सौरभान्विताः ।
पाटलामोदवत्यश्च काश्चित्काश्मीरसौरभाः ॥ ४०॥

सर्वगन्धयुताश्चान्या मदविह्वलितेक्षणाः ।
सिताभा प्रसिताभाश्च काश्चित् क्षितिजभाः शुभाः ॥ ४१॥

सुतप्तकनकाभासा नानावर्णाश्च कोटिशः ।
मुख्यास्ता नायिका रम्या दास्यस्तासां सहस्रशः ॥ ४२॥

एकैकशः प्रयत्नेन सेवन्तेऽनिशमुत्तमाः ।
दृष्ट्वा ता भगवान् रामो रमणेच्छुरभुद् विभुः ॥ ४३॥

आत्मस्वरूपाननुगानसृजत्पुरुषान्वरान् ।
श्यामलान् सुस्मितमुखान् सर्वाभरणभूषितान् ॥ ४४॥

किशोरान् कमनीयाँश्च कामविद्याविशारदान् ।
रसास्वादानुरागांश्च किरीटकुण्डलान्वितान् ॥ ४५॥

ते सर्व्वं विपिनं दृष्ट्वा शोभमानं मनोरमम् ।
कामवाणाभिसंविद्धा मत्तगानसमुत्सुकाः ॥ ४६॥

विधुमुखशीधुभ्रमरो यो रसिकपतिर्जयत्यनन्तात्मा ।
बहुजलदपटलनीलो सुरतविदग्धसङ्गरो रामः ॥ ४७॥

॥ इति श्रीहनुमत्संहितायां परमरहस्ये महारासोत्सवे तृतीयोऽध्यायः ॥

## ४. अथ चतुर्थोऽध्यायः ।

अगस्त्य उवाच -
शुष्कं कर्णविलम्मेऽद्य तव वाचा सुवारिणा ।
सिञ्चयस्व महाभाग तवाऽनुग्रहमात्रतः ॥ १॥

श्रीहनुमानुवाच -
कुहूकुहूश्चैव रटन्मुहुर्मुहुर्नटन्नटँश्चूतनवाङ्कुरेषु ।
उन्मत्तवत्काकभृतः प्रमत्तः प्रियम्प्रियायाः कलनं करोति ॥ २॥

नृत्यन्ति नित्यं शिखिनः समन्तात् गायन्ति गीतं विविधं शुकाद्याः ।
अन्यद्विजाश्चारुमनोहराणां गिरां प्रबन्धानभिवादयन्ति ॥ ३॥

अदृष्टपूर्वाश्च मृगाश्च गावो ग्रासं जजक्षुश्च तृणाङ्कुराणां
विलोक्य रामं प्रवरप्रभाव मर्द्धार्द्धम्भक्षन्ति विहाय चार्द्धम् ॥ ४॥

निमेषहीनोर्द्धवमुखाः समन्ता दूर्द्धं स्वकर्णौ कृतवन्त एके ।
मुञ्चन्ति नेत्रैर्जलबिन्दुमन्ये कृतोर्ध्वरोमा मुदितेन्द्रियाश्च ॥ ५॥

दृष्ट्वाऽद्भुतं रासरसं मनोज्ञं योगीव भोगी गतदेहबुद्धिः ।
विनिःसृतार्धो विवराद् वराच्च निश्चेष्टितो भेकनिमग्नभोगः ॥ ६॥

काचित्तु पञ्चाननमध्यमध्या मालेवबालाप्रियकण्ठलग्ना ।
अभ्रं दधाना चपलेव मुग्धा श्यामाचलान्निः सृतहेमधाराः ॥ ७॥

काचिच्च रामा रमणीयवेषा कामातुरा राममुखं चुचुम्ब ।
मुदा शरच्चन्द्रमसः सकाशात्सुधां ययाचेव चकोरिकाकिम् ॥ ८॥

नव्या सुभव्या यत सव्यदक्षिणौ प्रियागले चारु भुजौ ददावयम् ।
सुमेरुमध्ये पतिता यथाचलाद् धाराद्विधाभूयकलिन्दजन्मनः ॥ ९॥

प्रफुल्लतापिच्छसमं स्फुरद् वपुर्नितम्बिनीमध्यगतं शुभप्रदम् ।
विभाति तन्मन्मथचित्तमर्दनं नीलं यथा स्वर्णलताभिरावृतम् ॥ १०॥

काचित्क्वचित्कुञ्जगता सुबाला कामाकुला राममुखं निरीक्ष्य ।
ह्रिया न किञ्चिद्वदति स्वभीक्ष्णङ्करे करं न्यस्य जहास प्रीत्या ॥ ११॥

काचिच्च बाला विमला निकुञ्जगा सुखेन रामं परिरभ्य सस्मिता ।
निरीक्ष्य सा चारुमुखं श्रियायुतं पुनः पुनश्चुम्बति सादरेण ह ॥ १२॥

कान्तामुखं वीक्ष्य रघूत्तमेन विहस्य पद्मानननमात्मनस्तत् ।
पुनः स्वयं सङ्कुचितं च तत्र दृष्ट्वा
शरच्चन्द्रमसः प्रकाशम् ॥ १३॥

वरानना वराननाङ्गगा मुदा विराजते कदा
कुहूक्षपान्तरे हिमांशुचन्द्रिका नु किम् ।

विदग्ध चारुनागरं विधाय वक्षसि प्रिया
यथा नवीननीरदैः समाचितौ सुभूधरौ ॥ १४॥

सुराङ्गना नराङ्गना समीरपावकाङ्गना
वराङ्गना पदत्विषा विनिर्जिता सुभामिनी ।
प्रिया प्रियेण विधृता प्रनर्त्तती शुचिस्मिता
विलोलुपा दधार सत्पथं चलत्सुचचञ्चलम् ॥ १५॥

नृत्यश्रमायाःशिथिलीकृभाङ्ग्या मल्लिप्रसूनानि पतन्ति केशात् ।
अपूर्वशोभानितरान्समापुर्यथोदविन्दून् विकरन्ति मेघाः ॥ १६॥

आलोलपाणिचरणास्मितदृग्विभङ्गी विभ्रद्वलद्वलय कङ्कणनूपुराणि ।
आश्लिष्टकण्ठकुचको जनकात्मजाया रामो रराज भवनाटकनाट्यवेषः ॥ १७॥

लसल्ललितनीरदद्युति दधद् वपुः श्यामलं
तथा स्थिरतडिल्लता जनकनन्दिनी वामतः ।
लसत्कमलकौतुकं निजजनस्य सञ्जीवनं
हरत्स्मररिपोर्मनो रसिकमौलिमालं भजे ॥ १८॥

रामस्य वामे दक्षे च राजते प्रमदोत्तमा ।
सूत्रे मरकतस्येवोभयगा स्वर्णवल्लरी ॥ १९॥

मृदङ्गमुरलीवीणापणवानकजर्जरान् ।
वादयन्ति प्रयत्नेन नानायन्त्राणि वादिका ॥ २०॥

सप्तस्वरेण गायन्ति छालक्यं रागरागिणी ।
माधुर्य्येण वरार्हेण विदग्धा रामसद्गुणान् ॥ २१॥

तेन वाद्येन गानेन मोहितो रघुनन्दनः ।
स्वगुणेन गुणग्राही कामिनी कामनास्पदम् ॥ २२॥

प्रियया सहितः प्रेम्णा हास्यलास्ये मनोदधे ।
सभाजिरे रसावेशात् कारयामास मण्डलीम् ॥ २३॥

रणयन्नूपुरपादे कणयन्कङ्कणं करे ।
कलयन् किङ्किणीं कट्यां वलयान्वादयन्मुहुः ॥ २४॥

नीलपीताम्बरधरौ स्रग्विणौ च शुचिस्मितौ ।
विराजेते महापीठे सुन्दरे रासमण्डले ॥ २५॥

सर्वासर्वे प्रनृत्यन्ति नर्तयन्ति परस्परम् ।
गायन्ति गाययन्त्यश्च नन्दन्त्यो नन्दयन्ति च ॥ २६॥

लोलालका परिभ्रान्त्या वेणी श्रेणीभिरञ्जिताः ।
वङ्कताटङ्कधारिण्यो गण्डमण्डलमण्डिताः ॥ २७॥

ताभिः परमहर्षेण रमते रघुनन्दनः ।
यथा पूर्णशशी तारावेष्टितो भाति निर्मलः ॥ २८॥

एवं प्रियाः प्रयत्नेन प्राप्य रासरसोत्सवम् ।
न त्यजन्ति प्रियं कान्तं यथा रङ्काः श्रिया युतम् ॥ २९॥

भजामि सरयूतीरमाश्रितं रघुनन्दनम् ।
जानक्याश्च महारासरसिकं नटिनं हरिम् ॥ ३०॥

स्मृतावेश द्रवच्चित्तं नाथं गीतोत्सुकं परम् ।
अनन्तलीलासंयुक्तं रामचन्द्रं भजाम्यहम् ॥ ३१॥

नर्म्मप्रियं मर्मयुतं नर्मज्ञं नर्मकोविदम् ।
नर्मप्रियप्रियायुक्तं भजामि रघुवंशजम् ॥ ३२॥

काचिद्विरहसन्तप्ता नितान्तं कान्तमुत्तमम् ।
न जहाति प्रयत्नेन प्रवसत्पतिका यथा ॥ ३३॥

काचिद्दृष्ट्वा प्रियं काभिर्भुक्तं लाञ्छनलाञ्छितम् ।
छद्मना चाटुवाक्येन खण्डितेवाचरत्यहो ॥ ३४॥

काचित्प्रिये प्रणमति प्रागुक्तायाप्रियं ह्रिया ।
सन्तापमगमत्स्वैरं कलहान्तरिता यथा ॥ ३५॥

काचित्सङ्केतकुञ्जान्तर्गता तत्र न पश्यति ।
प्रियं सखीं भर्त्सति स्म विप्रलम्भेव भामिनी ॥ ३६॥

काचित्कुञ्जस्थिता बाला कान्तागमनमिच्छति ।
विरहानलतप्ताङ्ग्य भवत्सोत्कण्ठिता यथा ॥ ३७॥

काचिन्मालां ग्रथयन्ती गायन्ती प्रियचेष्टितम् ।
पुष्पशय्यां सज्जयन्ती यथा वासकज्जिका ॥ ३८॥

काचित्प्रियं न त्यजन्ती क्षणमात्रमुरस्थलात् ।
प्राणात्परञ्च सङ्गोप्य यथा स्वाधीनभर्त्तृका ॥ ३९॥

काचित्कान्तार्थिनी कान्तं द्रुतमुद्दिश्य गच्छति ।
कुञ्जात्कुञ्जं प्रविशति यथा प्रेम्णाभिसारिका ॥ ४० ॥

काचिन्मानवती बाला प्रणयेन वशीकृतम् ।
कान्त प्रहितदूत्त्यग्रेटनटयन् चाटुवाक्यतः ॥ ४१ ॥

हावभावप्रभावज्ञा रामाग्रे कापि सस्मिता ।
नानाशोभैर्महानादैस्तोषिता राममण्डले ॥ ४२ ॥

काचिच्चामरहस्ताच काचिद्व्यञ्जनहस्तका ।
सुगन्धमाल्यहस्ताच स्थिता कमलहस्तका ॥ ४३ ॥

स्वर्णपात्रे जलं काञ्चित्कृत्वा कौतूहलान्विताः ।
मिष्ठान्नैश्च समायुक्तं काश्चित्काञ्चनभाजनम् ॥ ४४ ॥

काचित्घटं करे धृत्वा मैरेयकं युतं रहः ।
अव्यग्राऽग्रे प्रेमयुता ददृशू राघवं मुदा ॥ ४५ ॥

सितातपत्रकं काश्चित्काञ्चित्ताम्बूलमुत्तमम् ।
कुङ्कुमागुरुकस्तूरीचन्दनाद्यैः प्रपूरितम् ॥ ४६ ॥

लेपपात्रं करे धृत्वा चान्या रामपरायणाः ।
नानायन्त्रकराः काश्चिदिङ्गितज्ञा मनोरमाः ॥ ४७ ॥

सेवन्त्योऽहरहः प्रीत्या सप्रीतं रघुनन्दनम् ।
रासेश्वरीं निरीक्षन्तं सद्भक्त्या भक्तवत्सलम् ॥ ४८ ॥

रासार्णवसुखवारिणि चारुक्रीडातरङ्गसङ्कीर्णे ।
स्त्रीरत्नानां हेतोर्ममज्ज मनो रामचन्द्रस्य ॥ ४९ ॥

रासे सरोनिकाशे स्वर्गङ्गायाः प्रेमवारिपूर्णे ।
विकसितमाननकमलं पात्रं यत्र मधुव्रतो रामः ॥ ५० ॥

रामोरसि शशिवदनी विलसत्यतिप्रेमभावसंयुक्ता ।
दलिताञ्जनचयसदने मनसिजदयितेव रञ्जिता भाति ॥ ५१ ॥

विलसदलसनेत्रां रामगात्रानुरक्तां
सुरुचिरमुखपद्मे स्वेदविन्दून्दधानाम् ।
शिथिलतनुकचश्रीशोभया भ्राजमानां

नमत जनकपुत्रीं प्रेमसंवर्द्धिनीं ताम् ॥ ५२॥

अमलकमलनेत्रं जानकीप्रेमपात्रं
सजलजलदगात्रं पीतवस्त्रं दधानम् ।
उरसि कुसुममालं कौस्तुभासक्तकण्ठं
स्मितरुचिरविकाशं रामचन्द्रं भजेऽहम् ॥ ५३॥

॥ इति श्रीहनुमत्संहिताया परमरहस्ये रासोत्सवे चतुर्थोऽध्यायः ॥

## ५. अथ पञ्चमोऽध्यायः ।

अगस्त्य उवाच -
तवाननाद् वाक्प्रभवप्रभाकरात् प्रफुल्लितं मद् धृदयं सरोरुहम् ।
सीतासखीभिः सह यत्र साम्प्रतं पूर्णेन्दुवन्नन्दति रामभद्रः ॥ १॥

श्रीहनुमानुवाच -
श्रान्तं कान्ताननं कान्तं स्वेदेन परिपूरितम् ।
दृष्ट्वा रामः प्रहृष्टात्मा मज्जनाय मनोदधे ॥ २॥

तास्सर्वा मुदितास्तत्र भगवन्तं रघूत्तमम् ।
नानाभरणसम्पन्ना वेष्टिताः स्नानचेष्टिताः ॥ ३॥

नृत्यं वाद्यैः सुमधुरैः राकीर्णौछत्रचामरैः ।
गच्छन्तौ भासमानौ तौ हंसकुञ्जरगामिनौ ॥ ४॥

प्राप्तौ तौ सलिलाभ्यासं तरङ्गैरुपशोभितम् ।
महोत्पलशिवाजुष्टं कामोद्दीपनकारकम् ॥ ५॥

सरयूतटं प्रियं दृष्ट्वा जानक्यालिङ्गितं प्रभुम् ।
शीतलेन सुगन्धेन जलेन पदपङ्कजम् ॥ ६॥

प्रक्षाल्य जलजैः पुष्पैः सत्कृत्य तदनन्तरम् ।
नानोपचारैर्नैवेद्यैः पूजयामास तं सती ॥ ७॥

ततः परमहर्षेण जानक्या सह राघवः ।
क्रीडयन् वारिमध्ये च यथा मत्तमतङ्गजः ॥ ८॥

सखीभिः सहितो भाति भगवान् सर्वकामदः ।
काचित्करे करन्धृत्वा वार्यगाधेक्षिपन्मुदा ॥ ९॥

काचिच्च कैतवतया रामाङ्गे निपतत्यहो ।
काचित्तीरात्प्रपतति जले काचिन्निमज्जति ॥ १०॥

यन्त्रिका बाहुयन्त्रेण काचित्कमललोचना ।
रामं काचित् सिञ्चयन्ती करमुक्तेन वारिणा ॥ ११॥

परस्परं जलकणान् सिञ्चयन्त्यो वराङ्गनाः ।
काचिज्जलं करतलैस्ताडयन्ती मुहुर्मुहुः ॥ १२॥

महान्शब्दोऽभवत्तत्र समुद्रमथने यथा ।
काचित्सन्तारयन्प्रेम्णा काञ्चिच्चोरसि कानयन् ॥ १३॥

न्यपतच्च महागाधे प्रहस्य रघुनन्दनः ।
काचिन्मग्नभयाक्रान्तं गाढमालिङ्गनं ददौ ॥ १४॥

काचित्प्रवाहपतिता तरङ्गैर्वारितांशुका ।
ह्रिया नायाति निकटं सङ्कटं बहु मन्यते ॥ १५॥

तां तु काचित्करे धृत्वा चागता राघवान्तिकम् ।
लज्जयाऽधोमुखी भूत्वा निमज्जति जलेऽमले ॥ १६॥

चिबुके द्व्यङ्गुलं दत्वा गण्डे गण्डं नियुज्यताः ।
यथा कमलवक्त्रं ते चञ्चरीकाश्चुचुम्बिरे ॥ १७॥

सुस्नाता वारिभिः क्लिन्ना निरीहा विवृताननाा ।
रुक्माङ्गी सूक्ष्मवसना नग्ना मग्ना जले पुनः ॥ १८॥

एवं नानाविधानेन क्रीडयित्वा पुनः पुनः ।
उत्तस्थौ तीरमतुलं ताभिस्सह विलास कृत् ॥ १९॥

तत्र सर्वाभिरालीभिर्बभौ श्रीरघुनन्दनः ।
ततो मञ्जुलकङ्कुञ्जं प्रविश्य परमाद्भुतम् ॥ २०॥

परमंसुखदं धाम जगाम श्रीरघूत्तमः ।
हास्यलास्यविनोदेन प्राप्य स्थानमनुत्तमम् ॥ २१॥

सुरागमूले विमले मण्डपे मणिमण्डिते ।
तोरणैर्हेमकलशैर्मणिस्तम्भैर्विराजिते ॥ २२॥

राङ्कवास्तरणे दिव्ये विस्तीर्णपरमासने ।
तत्र सिंहासनं कान्तं नानामणिभिरावृतम् ॥ २३॥

तन्मध्ये षोडशदलं पद्मं ज्योतिर्मयं परम् ।
न्यवसद्राघवस्तत्र सीतया सह सुव्रतः ॥ २४॥

तत्र कुञ्जान्यनेकानि प्रफुल्लानीह सर्वतः ।
पक्षिसङ्घस्य निनदैर्नादितानि मनोहरैः ॥ २५॥

यत्रर्त्तवो वसन्ताद्याः फलपुष्पसमन्विताः ।
नवपल्लवनम्राग्रा भ्रमद्भ्रमरवेष्टिताः ॥ २६॥

वहन्ति वाताः पद्मानां गन्धस्पर्शमनोरमाः ।
कामदाः कामिनीनाञ्च मनोह्लादकराः पराः ॥ २७॥

तत्पद्मे षोडशदले वयस्याः सन्ति सोत्सुकाः ।
क्रमेण तासां नामानि श्रूयतां मुनिसत्तम ॥ २८॥

उज्ज्वला काञ्चनी चित्रा चित्ररेखा सुधामुखी ।
हंसी प्रशंसी कमला विशदाक्षी सुदन्तिका ॥ २९॥

चन्द्रानना चन्द्रकला माधुर्य्यशालिनी वरा ।
कर्पूराङ्गी वरारोहा इत्याद्या षोडश स्मृताः ॥ ३०॥

तस्य पद्मस्योपदले राजन्ते षोडशाङ्गनाः ।
शृणु नामानि तासां वै महामुनिवरेश्वर ॥ ३१॥

शोभना शुभदा शान्ता सन्तोषा सुखदा सती ।
चारुस्मिता चारुरूपा चार्वङ्गी चारुलोचना ॥ ३२॥

हेमा क्षेमा क्षेमदात्री धात्री धीरा धरा स्मृताः ।
अनेकसेवाभिरताः सेवन्तेऽनिशमुत्तमाः ॥ ३३॥

क्षीरोद्भवा भद्ररूपा भद्रदा भववर्जिता ।
विद्युल्लता पद्मनेत्रा पावनी हंसगामिनी ॥ ३४॥

रमणीया प्रेमदात्री कुङ्कुमाङ्गी रसोत्सुका ।
एताः सख्यो वसन्त्यत्र दलेषु द्वादशेषु च ॥ ३५॥

महार्हा माधवी माल्या कामदा काममोहिनी ।
रतिर्क्षितिर्नीतिमती प्रीतिदा कुशला कला ॥ ३६॥

नीलाद्या याश्चोपदले सेवन्ते रघुनन्दनम् ।

दृश्यन्ते च महाप्रेममग्ना कौतूहलान्विताः ॥ ३७॥

ततोऽष्टदलमध्ये च नानासौभाग्यसंयुताः ।
कुञ्जाधिपा सुसख्यस्तानित्यसेवनतत्पराः ॥ ३८॥

प्रथमं वेषकुञ्जन्तौ प्रविष्टौ नर्मभिर्वृतौ ।
विलासिनी सखी तत्र दृष्ट्वा रासेश्वरं मुदा ॥ ३९॥

वेषं चकार सा शीघ्रं वस्त्वालङ्कृतकाञ्चनैः ।
उभयोर्नवदम्पत्योरनुरूपं सुभक्तितः ॥ ४०॥

गत्वा तु मालतीकुञ्जं साङ्गानन्दा सखी यतः ।
तया सेवा सङ्गृहीतौ प्रेम्णा परमहर्षितौ ॥ ४१॥

केलिकुञ्जान्तर्गतः श्रीरामः सीतया सह ।
यत्र वृन्दा सखी नित्या नित्यानन्दे निमज्जति ॥ ४२॥

विहरत्यत्र हर्षेण केलिकौतूहलेन च ।
तोषयित्वा वयस्यां तां कामनाकलनेन च ॥ ४३॥

ततस्तु सुखदं राम कुञ्जं दृष्ट्वा मनोरमम् ।
उभौ परमसन्तुष्टौ विराजेते सदाऽत्रवै ॥ ४४॥

ततो हिन्दोलके कुञ्जमान्दोलित्वा मुहुर्मुहुः ।
सख्याः प्रेमप्रदर्शिन्याः पूर्णं कृत्वा मनोरथम् ॥ ४५॥

वसन्तकुसुमैर्यत्तु वेष्टितं परमाद्भुतम् ।
कोकिलालिगणैर्जुष्टं कामसन्दीपकारकम् ॥ ४६॥

सखिभिः सीतया सार्द्धं गतो भोजनकुञ्जकम् ।
सदानुमोदनी सख्या भोगैः सन्तर्पितौ मुदा ॥ ४७॥

शयनीयं चारु कुञ्जं दृष्टवान् भगवान्प्रभुः ।
प्रहर्षमतुलं लेभे कोमलास्तरणैर्वृतम् ॥ ४८॥

स्थिता यत्र सखी साक्षात् श्रीमन्मदनमञ्जरी ।
सुष्वाप सीतया सार्द्धं तया प्रेम्णा प्रबोधितः ॥ ४९॥

अष्टपत्रस्योपकोणे वल्ली पादपमण्डिता ।
माधवी चम्पका मल्ली पुन्नागा मालती तथा ॥ ५०॥

लवङ्गलतिका धात्री तुलसी परमाद्भुता ।
सर्वगन्धयुताः सर्वाः सर्वपुष्पप्रपूरिताः ॥ ५१ ॥

फलानि यत्र स्वादूनि पत्राण्यप्यमृतादपि ।
तत्र सख्यो विराजन्ते यत्र हास्य प्रहर्षिताः ॥ ५२ ॥

गायन्त्यो नृत्यवन्त्यश्च वीक्ष्यन्त्यश्च सुदम्पती ।
तासां नामान्यपि मुने ! श्रूयन्तां हृदि धारय ॥ ५३ ॥

वीणावती वेणुहस्ता वीणाहस्ता सुगन्धिका ।
कविलासविलासेन शोभाशोभान्विताऽभवत् ॥ ५४ ॥

सप्तस्वरान् सुखेनैव धृत्वा सा सुखदा सती ।
खञ्जनाक्षीकरे कृत्वा खञ्जरी रसमञ्जरी ॥ ५५ ॥

करे गानकलां नीत्वा मृदङ्गं मधुरस्वरम् ।
सारङ्गलोचनी शार्ङ्गी वादयत्यतिहर्षिता ॥ ५६ ॥

सुखदा च सुखस्पर्शा सुखमण्डलमण्डिता ।
सर्वासर्वरसाभिज्ञा श्रीरामेङ्गितबोधिका ॥ ५७ ॥

वराटके सन्ततहाटकान्विते महामणीन्द्राद्भुतचारुमण्डपे ।
सोमार्कवह्निद्युतिकोटिवञ्चके चिन्तामणेश्चित्तविमोहकारके ॥ ५८ ॥

तत्रोल्लसत्पीठपवित्रनिर्मले मन्त्रैश्चवर्णार्णशतैः समन्विते ।
सुकोमले केवलवर्च्चसां निधौ विना गुरोर्वाक्यमगम्यरूपके ॥ ६० ॥

सर्वबीजैः सप्रणवैः सर्वमन्त्रैश्च वेष्टिते ।
यथा मणिगणानाञ्च राजते मध्यनायकः ॥ ६१ ॥

तत्रावसत्पद्मपलासलोचनः प्रलम्वबाहुः स्मितशोभिताननः ।
प्रतप्तचामीकरभूषणाञ्चितो यस्याङ्गगा श्रीजनकात्मजा प्रिया ॥ ६२ ॥

परस्परालिङ्गितमिङ्गिताङ्गं हास्येन वाक्येन च शोभमानम् ।
रसास्पदं सर्व्वसुखास्पदं तं नमामि रासेश्वरमप्रधृष्यम् ॥ ६३ ॥

तत्र सख्यः सुसेवन्ते ससीतं राघवं मुदा ।
लक्ष्मणा चारुशीला च भद्रा मानवती तथा ॥ ६४ ॥

परमानन्दजननी हृद्या सर्वाङ्गशोभिता ।
धृत्वातपत्रं काचित्तु बर्हिणः पुच्छगुच्छकम् ॥ ६५ ॥

काचिद् धृत्वा चामरञ्च काचित्ताम्बूलमुत्तमम् ।
सर्वाङ्गदर्पणं काचिज्जलं काचिदुशत्तमा ॥ ६६॥

मङ्गलं कलशं काचिद्धृत्वा स्वर्णजमुत्तमम् ।
आनन्दमग्नाः सर्वाश्च पश्यन्ति रमयन्ति च ॥ ६७॥

नित्यसिद्धा नित्यसाध्या दम्पत्योः पादसेवनम् ।
कुरुते परया भक्त्या नानाभावप्रपूरिताः ॥ ६८॥

अयोध्या सरयूश्चाग्रे यन्त्रहस्ता शुचिस्मिता ।
निरीक्षते रामवक्त्रं प्रेमामृतपरिप्लुताः ॥ ६९॥

सुरुचिर जलदाभम्भावनाभावगम्यं
कनकनिकरभास्वज्जानकीवामभागम् ।
स्मित शुचिमुख कान्तं कामनिःकामकारं
नमत हृदि वराब्जे प्रीतिरासेश्वरन्तम् ॥ ७०॥

जयति जनकजायाः पादपद्मं मनोज्ञं
हरहरिविधिवन्द्यं साधकानां सुसेव्यम् ।
नखरनिकरकान्तं मुद्रिकानूपुराद्यै-
र्हृदयकमलमध्ये योगयोगीशभाव्यम् ॥ ७१॥

जयत्याध्यारमणो रसात्मा विलासिनी केलिकलाभिलाषः ।
सुचारुचामीकरचीरधारी धरासुता चित्तविनोदकारी ॥ ७२॥

न चन्द्रस्य गतिस्तत्र न सूर्य्यस्य गतिस्तथा ।
प्रभया रामचन्द्रस्य सीतायाश्च प्रभावतः ॥ ७३॥

सदा प्रकाशतेऽत्यर्थं स्थलं परमशोभनम् ।
यद्ध्यात्वा निमिषार्द्धेन रसिका यान्ति तत्पदम् ॥ ७४॥

अयोध्या नगरी रम्या सप्तपुर्य्यधिकारिणी ।
भगवानादिपुरुषो रमते तत्र चाद्यया ॥ ७५॥

आह्लादिनी शक्तिरूपा जानकी यस्य वामतः ।
तं रामं सच्चिदानन्दं नित्यं रासेश्वरं भजे ॥ ७६॥

तुरीया जानकी प्रोक्तः तुरीयो रघुनन्दनः ।

उभयोरंशजाः सर्वे चावतारा ह्यसङ्ख्यकाः ॥ ७७॥

सर्व्वेषामवताराणामवतारी रघूत्तमः ।
श्रुतं दृष्टं मया सर्वं चिरायाजीवतान्मुने ॥ ७८॥

ब्रह्मरुद्रसुरेशाद्या सन्तीमे चिरजीविनः ।
सर्वेऽपि विभवासक्ता यतोऽहं विभवात्परः ॥ ७९॥

माधुर्य्ये च वयस्याहमैश्वर्य्ये हनुमान् कपिः ।
किञ्चित्तेनैव जानामि रहस्यं रामसीतयोः ॥ ८०॥

नित्यलीला परिकरा ये स्यू रघुवरादयः ।
तैस्सार्द्धं भगवान् रामोऽयोध्यायामेव दीप्यते ॥ ८१॥

गोलोकसाकेतसमावुभौ मुने कदापि भेदो नहि राघवस्य च ।
उभौ तु विश्रामनिवासधाम्नी परस्परावसदृशे विलासतः ॥ ८२॥

अस्माद्रासादादिभूतान्नानारासो भविष्यति ।
ज्ञात्वैवं रसिका सर्वे रमन्ते कथयन्ति च ॥ ८३॥

अस्मिन्महारासरसोत्सवाब्धौ निविष्टचेता रसिकाग्रणी यः ।
विधौ निषेधे दुरिते सुकर्मणि न बाध्यते सोऽपि यथा सदागतिः ॥ ८४॥

कैवल्यदौर्बल्यकरं महारसं सीतापतेः रामविलासमद्भुतम् ।
कायेन वाचा मनसा रमेद् बुधः यथा हि गोलोकमनामयं पदम् ॥ ८५॥

इदं रहस्यं परमं सुगोपनं मयैव चोक्तं निगमागमात्परम् ।
यः श्रद्धया भक्तियुतः पठेद् वा स याति रामस्य पदं महामुने ॥ ८६॥

यो भावुको भावयते हृदम्बुजेने रामस्य रासं रसवारिपूरितम् ।
पिबेच्च सत्सामसुधाधिकं रसं न रोचते क्षारजलं यथा किल ॥ ८७॥

श्रुत्वा रहस्यं परमं पवित्रं महामुनिः सुस्थिरमानसोऽभवत् ।
परस्परालिङ्गितभावयुक्तं दत्वा ययौ ह्याश्रमात्मनस्तम् ॥ ८८॥

गच्छन् गच्छन् पथि मुनिवरः पूर्णप्रेमामृताब्धौ
मज्जन् मज्जन् सपदि पदयोर्न्यासभेदं न वेद ।
पश्यन्पश्यन् हृदि रघुपतिं सीतया शोभिवामं
हृष्यन्हृष्यन्परममुदितः प्राप गेहं चिरायुः ॥ ८९॥

गते मुनावासुगसम्भवोऽसौ सम्भावयन् ध्यानमना बभूव ।

स्मरन् स्मरन् रासरसं हृदब्जे बाह्येन्द्रियज्ञानमनो निवृत्तम् ॥ ९० ॥

हनूमतो महाकाव्यं भाव्यं श्राव्यं सदैव हि ।
तस्मिन् ससीतो रामोऽपि तुष्टो भवति सर्वथा ॥ ९१ ॥

॥ इति श्रीहनुमत्संहितायां परमरहस्ये रासोत्सवे पञ्चमोऽध्यायः ॥

!! श्रीरामचन्द्रम्भजे, शुभं भवतु !!

Encoded and proofread by Mrityunjay Rajkumar Pandey

*Shri Hanumat Samhita*

pdf was typeset on February 25, 2025

Please send corrections to *sanskrit@cheerful.com*